योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ४९

अज्ञातलेखकः

एकोनपञ्चाशः सर्गः ४९

श्रीवसिष्ठ उवाच ।

अथ काननमध्यस्थं चुम्बिताम्बुदमण्डलम् ।

मध्याह्नखिन्नसूर्याश्वसेवितस्कन्धमण्डलम् ।। १

वितानमिव दिक्कुक्षिदीर्घं विटपबाहुभिः ।

आलोकयन्तं ककुभो विकासिकुसुमेक्षणैः ।। २

वातावधूलितानल्पभ्रमद्भ्रमरकुन्तलम् ।

प्रमार्जयन्तमाशानां मुखं पल्लवपाणिभिः ।। ३

कच्छैरुरुगुडुच्छाच्छमञ्जरीपुञ्जकञ्जरैः ।

आस्यैरिव सताम्बूलैर्हसन्तं वनमालिकाः ।। ४

लताविलसितोल्लासैः पुष्पकेसरधूलिभिः।

आबद्धमण्डलाभोगं पूर्णेन्दुमिव दीप्तिभिः ।। ५

संकटं विटपावल्या कुञ्जकूजच्चकोरया ।

छन्नया सिद्धवीथ्येव जगदुच्चतया श्रितम् ।। ६

स्कन्धपीठोपविष्टानां लम्बमानैः कलापिनाम् ।

कलापैः शोभितं व्योम सेन्द्रचापैरिवाम्बुदैः ।। ७

मग्नोन्मग्नैः प्रतिस्कन्धमाश्रितैश्चमरैः सितैः ।

पूर्णं मुहुर्दृष्टनष्टैः संवत्सरमिवेन्दुभिः ।। ८

कपिञ्जलकुलालापैः कलकोकिलकूजितैः ।

जीवंजीवविरावैश्च प्रगायन्तमिवोच्छ्रितैः ।। ९

कादम्बककदम्बैश्च कुलायकृतकेलिभिः ।
स्वर्गकोटरविश्रान्तैः सिद्धैर्जगदिवावृतम् ।। १०
प्रवालचलहस्ताभिरलिनेत्राभिराश्रितम् ।
अप्सरोभिरिव स्वर्गं मञ्जरीभिरितस्ततः ।। ११
सेन्द्रचापविलासेन कुमुदोत्कररेणुना ।
मञ्जरीपिञ्जराश्यामं विद्युत्वन्तमिवाम्बुदम् ।। १२
सहस्रभुजशाखाख्यं पूरिताकाशकोटरम् ।
विश्वरूपमिवोन्नृत्तं चन्द्रार्ककृतकुण्डलम् ।। १३
तले निषण्णनागेन्द्रं व्योम्नि तारागणाकुलम् ।
लतापुष्पमयं मध्ये खमण्डलमिवापरम् ।। १४
पितामहमिवाशेषशैलकाननशालिनम् ।
फलपल्लवपुष्पाणां कोशमेकमिवावनौ ।। १५
दधानं कलिकाजालं स्थगितं पुष्पधूलिभिः ।
कच्छेष्वर्ककरच्छन्नताराजालमिवाम्बरम् ।। १६
विलोलविहगैः स्कन्धैः कुलायकुलसंकुलैः ।
वलितं भूतलं लोके पूर्णैर्जनपदैरिव ।। १७
मञ्जरीसुपताकाढ्यं लतामण्डलमण्डितम् ।
पुष्पमङ्कोलधवलं पुष्पप्रकरपूरितम् ।। १८
कूजच्चकोरभ्रमरशुककोकिलसारिकम् ।
घनस्तबकसंछन्नकुहरोग्रगवाक्षकम् ।। १९
संचरत्पक्षिबहुलं जनमन्थरकोटरम् ।
सर्वासां वनदेवीनामन्तःपुरमिवोत्तमम् ।। २०
कूजद्भृङ्गतरङ्गौघैः पुष्पकेसरराजिभिः ।
राजमानं पतन्तीभिः सरिद्भिरिव पर्वतम् ।। २१
भ्रमद्भिः पुष्पपत्रौघैर्मन्दवातविलासिभिः ।
वर्धमानैर्वृतस्कन्धं शुभ्राभ्रैरिव भूधरम् ।। २२

मातङ्गकटघृष्टेन जानुस्तब्धेन पीठिना ।

आभोगिना बद्धपदं तरुणेव महाचलम् ।। २३

विचित्रवर्णपक्षाणां स्कन्धकोटरचारिणाम् ।

वृतं खगानां वृन्देन भूतानामिव शार्ङ्गिणम् ।। २४

स्तबकाङ्गुलिजालेन लोलेनाभिनयक्रियाम् ।

दिशन्तमिव वल्लीनां प्रवृत्तानां वनानिलैः ।। २५

कश्चिदेव निवासो मे नार्थिनामिति तुष्टितः ।

नृत्यन्तमिव बह्वाढ्यलतावलयवल्गनैः ।। २६

लताकान्तैककान्तत्वाच्छृङ्गाररसनिर्भरम्।

काकल्येव प्रगायन्तं मत्तालिनिजनिःस्वनैः ।। २७

आदरोन्मुक्तकुसुमं सिद्धानां व्योमचारिणाम् ।

स्वागतानीव कुर्वाणं कोकिलालिकुलारवैः ।। २८

लतापुष्पफलोल्लासं प्रान्तपञ्चमहीरुहाम् ।

विहसन्तमिवाच्छाभिः पुष्पकुड्मलदीप्तिभिः ।। २९

पारिजातमिवाजेतुमूर्ध्वगैः खगमण्डलैः ।

व्योमान्तराभिधावन्तमलमुद्धतकन्धरम् ।। ३०

मध्यभागस्फुरत्तुङ्गैः स्तबकैर्घनपङ्क्तिभिः ।

सहस्राक्षत्वमतुलैर्जेतुमिन्द्रमिवोद्यतम् ।। ३१

क्वचित्कुसुमगुच्छाच्छफणामणिगणावृतम्।

पातालादुत्थितं शेषमिव व्योमदिदृक्षया ।। ३२

रजसोद्धूलिताकारं द्वितीयमिव शंकरम् ।

छायया फलशालिन्या समस्तजनशंकरम् ।। ३३

निबिडदलनिवाहभिन्नकोशैः कुसुमलतानवमण्डपैरुपेतम् ।

पुरमिव गगने कदम्बवृक्षं खगकुलनागरसंकुलं ददर्श ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० स्थितिप्रकरणे दाशूरो० दाशुरकदम्बवर्णनं नामैकोनपञ्चाशः

सर्गः ॥ ४९ ॥